मार्कण्डेयपुराणम्/अध्यायः ०४६-०५०



46(43)

षट्चत्वारिंशोऽध्यायः

क्रौष्टुकिरुवाच

भगवंस्त्वण्डसम्भूतिर्यथावत् कथिता मम ।

ब्रह्माण्डे ब्रह्मणो जन्म तथा चोक्तं महात्मनः ॥४६.१ ॥

एतदिच्छाम्यहं श्रोतुं त्वत्तो भृगुकुलोद्भव ।

यदान सृष्टिर्भूतानामस्ति किन्नु न चास्ति वा ।

काले वै प्रलयस्यान्ते सर्वस्मिन्नुपसंहृते ॥४६.२ ॥

मार्कण्डेय उवाच

यदा तु प्रकृतौ याति लयं विश्वमिदं जगत् ।

तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसञ्चरः ॥४६.३ ॥

स्वात्मन्यवस्थितेव्यक्ते विकारे प्रतिसंहृते ।

प्रकृतिः पुरुषश्चैव साधर्म्येणावतिष्ठतः ॥४६.४ ॥

तदा तमश्च सत्त्वञ्च समत्वेन व्यवस्थितौ ।

अनुद्रिक्तावनूनौ च तत्प्रोतौ च परस्परम् ॥४६.५ ॥

तिलेषु वा यथा तैलं घृतं पयसि वा स्थितम् ।

तथा तमसि सत्त्वे च रजोऽप्यनुसृतं स्थितम् ॥४६.६ ॥

उत्पत्तिर्ब्रह्मणो यावदायुषो द्विपरार्धिकम् ।

तावद्दिनं परेशस्य तत्समा संयमे निशा ॥४६.७ ॥

अहर्मुखे प्रबुद्धस्तु जगदादिरनादिमान् ।

सर्वहेतुरचिन्त्यात्मा परः कोऽप्यपरक्रियः ॥४६.८ ॥

प्रकृतिं पुरुषञ्चैव प्राविश्याशु जगत्पतिः ।

क्षोभयामास योगेन परेण परमेश्वरः ॥४६.९ ॥

यथा मदो नवस्त्रीणां यथा वा माधवानिलः ।

अनुप्रविष्टः क्षोभाय तथासौ योगमूर्तिमान् ॥४६.१० ॥

प्रधाने क्षोभ्यमाने तु स देवो ब्रह्मसंज्ञितः ।

समुत्पन्नोऽण्डकोषस्थो यथा ते कथितं मया ॥४६.११ ॥

स एव क्षोभकः पूर्वं स क्षोभ्यः प्रकृतेः पतिः ।

स सङ्कोचविकाशाभ्यां प्रधानत्वेऽपि च स्थितः ॥४६.१२ ॥

अत्पन्नः स जगद्योनिरगुणोऽपि रजोगुणम् ।

भुञ्जन् प्रवर्तते सर्गे ब्रह्मत्वं समुपाश्रितः ॥४६.१३ ॥

ब्रह्मत्वे स प्रजाः सृष्ट्वा ततः सत्त्वातिरेकवान् ।

विष्णुत्वमेत्य धर्मेण कुरुते परिपालनम् ॥४६.१४ ॥

ततस्तमोगुणोद्रिक्तो रुद्रत्वे चाखिलं जगत् ।

उपसंहृत्य वै शेते त्रैलोक्यं त्रिगुणोऽगुणः ॥४६.१५ ॥

यथा प्राग्व्यापकः क्षेत्री पालको लावकस्तथा ।

यथा स संज्ञामायाति ब्रह्मविष्ण्वीशकारिणीम् ॥४६.१६ ॥

ब्रह्मत्वे सृजते लोकान् रुद्रत्वे संहरत्यपि ।

विष्णुत्वे चाप्युदासीनस्तिस्त्रोऽवस्थाः स्वयम्भुवः ॥४६.१७ ॥

रजो ब्रह्मा तमो रुद्रो विष्णुः सत्त्वं जगत्पतिः ।

एत एव त्रयो देवा एत एव त्रयो गुणाः ॥४६.१८ ॥

अन्योन्यमिथुना ह्येते अन्योन्याश्रयिणस्तथा ।

क्षणं वियोगो नह्येषां न त्यजन्ति परस्परम् ॥४६.१९ ॥

एवं ब्रह्मा जगत्पूर्वो देवदेवश्चतुर्मुखः ।

रजोगुणं समाश्रित्य स्त्रष्टृत्वे स व्यवस्थितः ॥४६.२० ॥

हिरण्यगर्भो देवादिरनादिरुपचारतः ।

भूपद्मकर्णिकासंस्थो ब्रह्माग्रे समजायत ॥४६.२१ ॥

तस्य वर्षशतं त्वेकं परमायुर्महात्मनः ।

ब्रह्म्येणैव हि मानेन तस्य संख्यां निबोध मे ॥४६.२२ ॥

निमेषैर्दशभिः काष्ठा तथा पञ्चभिरुच्यते ।

कलास्त्रिंशच्च वै काष्ठा मुहूर्तं त्रिंशत्ता: कला: ॥४६.२३ ॥

अहोरात्रं मुहूर्तानां नृणां त्रिंशत्तु वै स्मृतम् ।

अहोरात्रैश्च त्रिंशद्भि: पक्षौ द्वौ मास उच्यते ॥४६.२४ ॥

तै: षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे ।

तद्देवानामहोरात्रं दिनं तत्रोत्तरायणम् ॥४६.२५ ॥

दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।

चतुर्युगं द्वादशभिस्तद्विभागं शृणुष्व मे ॥४६.२६ ॥

चत्वारि तु सहस्राणि वर्षाणां कृतमुच्यते ।

शतानि सन्ध्या चत्वारि सन्ध्यांशश्च तथाविध: ॥४६.२७ ॥

त्रेता त्रीणि सहस्राणि दिव्याब्दानां शतत्रयम् ।

तत्सन्ध्या तत्समा चैव सन्ध्यांशश्च तथाविध: ॥४६.२८ ॥

द्वापरं द्वे सहस्रे तु वर्षाणां द्वे शते तथा ।

तस्य सन्ध्या समाख्याता द्वे शताब्दे तदंशक: ॥४६.२९ ॥

कलि: सहस्रं दिव्यानामब्दानां द्विजसत्तम ।

सन्ध्या सन्ध्यांशकश्चैव शतकौ समुदाहृतौ ॥४६.३० ॥

एषा द्वाधशसाहस्त्री युगाख्या कविभि: कृता ।

एतत् सहस्रगुणितमो ब्राह्म्यमुदाहृतम् ॥४६.३१ ॥

ब्रह्मणो दिवसे ब्रह्मन् मनवः स्युश्चतुर्दश ।

भवन्ति भागशस्तेषां सहस्रं तद्विभज्यते ॥४६.३२ ॥

देवाः सप्तर्षयः सेन्द्रा मनुस्तत्सूनवो नृपाः ।

मनुना सह सृज्यन्ते संह्रियन्ते च पूर्ववत् ॥४६.३३ ॥

चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः ।

मन्वन्तरं तस्य संख्यां मानुषाब्दैर्निबोध मे ॥४६.३४ ॥

त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विज ।

सत्पषष्टिस्तथान्यानि नियुतानि च संख्यया ॥४६.३५ ॥

विंशतिश्च सहस्राणि कालोऽयं साधिकं विना ।

एतन्मन्वन्तरं प्रोक्तं दिव्यैर्वर्षैर्निबोध मे ॥४६.३६ ॥

अष्टौ वर्षसहस्राणि दिव्यया संख्यया युतम् ।

द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि तु ॥४६.३७ ॥

चतुर्दशगुणो ह्येष कालो ब्रह्म्यमहः स्मृतम् ।

तस्यान्ते प्रलयः प्रोक्तो ब्रह्मन् नैमित्तिको बुधैः ॥४६.३८ ॥

भूर्लोकोऽथ भुवर्लोकः स्वर्लोकश्च विनाशिनः ।

तथा विनाशमायान्ति महर्लोकश्च तिष्ठति ॥४६.३९ ॥

तद्वासिनोऽपि तापेन जनलोकं प्रयान्ति वै ।

एकार्णवे च त्रैलोक्ये ब्रह्मा स्वपिति वै निशि ॥४६.४० ॥

तत्प्रमाणैव सा रात्रिस्तदन्ते सृज्यते पुनः ।

एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत् ॥४६.४१ ॥

शतं हि तस्य वर्षाणां परमित्यभिधीयते ।

पञ्चाशद्भिस्तथा वर्षैः परार्धमिति कीर्त्यते ॥४६.४२ ॥

एवमस्य परार्धन्तु व्यतीतं द्विजसत्तम ।

यस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः ॥४६.४३ ॥

द्वितीयस्य परार्धस्य वर्तमानस्य वै द्विज ।

वाराह इति कल्पोऽयं प्रथमः परिकल्पितः ॥४६.४४ ॥

इति श्रीमार्कण्डेयपुराणे ब्रह्मायुप्रमाणो नाम

षट्चत्वारिंशोऽध्यायः

47(44)

सप्तचत्वारिंशोऽध्यायः ४७

क्रौष्टुकिरुवाच

यथा ससर्ज वै ब्रह्मा भगवानादिकृत् प्रजाः ।

प्रजापतिः पतिर्देवस्तन्मे विस्तरतो वद ॥४७.१॥

मार्कण्डेय उवाच

कथयाम्येष ते ब्रह्मन् ससर्ज भगवान् यथा ।

लोककृच्छाश्वतः कृत्स्नं जगत् स्थावरजङ्गमम् ॥४७.२॥

पद्मावसाने प्रलये निशासुत्पोत्थितः प्रभुः ।

सत्त्वोदिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत ॥४७.३॥

इमञ्चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।

ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् ॥४७.४॥

आपो नारा वै तनव इत्यपां नाम शुश्रुम ।

तासु शेते स यस्माच्च तेन नारायणः स्मृतः ॥४७.५॥

विबुद्धः सलिले तस्मिन् विज्ञायान्तर्गतां महीम् ।

अनुमानात् समुद्धारं कर्तुकामस्तदा क्षिते ॥४७.६॥

अकरोत् स तनूरन्याः कल्पादिषु यथा पुरा ।

मत्स्यकूर्मादिकास्तद्वद्वाराहं वपुरास्थितः ॥४७.७॥

वेदयज्ञमयं दिव्यं वेदयज्ञमयो विभुः ।

रूपं कृत्वा विवेशाप्सु सर्वगः सर्वसम्भवः ॥४७.८॥

समुद्धृकत्य च पातालान्मुमोच सलिले भुवम् ।
जनलोकस्थितैः सिद्धैश्चिन्त्यमानो जगत्पतिः ॥४७.९ ॥
तस्योपरि जलौघस्य महती नैरिव स्थिता ।
विततत्वात्तु देहस्य न मही याति संप्लवम् ॥४७.१० ॥
ततः क्षितिं समीकृत्य पृथिव्यां सोऽसृजद् गिरीन् ।
प्राक् सर्गे दह्यमाने तु तदा संवर्तकाग्निना ॥४७.११ ॥
तेनाग्निना विशीर्णास्ते पर्वता भुवि सर्वशः ।
शैला एकार्णवे मग्ना वायुनापस्तु संहताः ॥४७.१२ ॥
निषक्ता यत्र यत्रासंस्तत्र तत्राचलाभवन् ।
भूविभागन्ततः कृत्वा सप्तद्वीपोपशोभितम् ॥४७.१३ ॥
भूराद्यांश्चतुरो लोकान् पूर्ववत् समकल्पयत् ।
सृष्टिञ्चिन्तयतस्तस्य कल्पादिषु यथा पुरा ॥४७.१४ ॥
अबुद्धिपूर्वकस्तस्मात् प्रादुर्भूतस्तमोमयः ।
तमो मोहो महामोहस्तामिस्त्रो ह्यन्धसंज्ञितः ॥४७.१५ ॥
अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः ।
पञ्चधावस्थितः सर्गो ध्यायतोऽप्रतिबोधवान् ॥४७.१६ ॥
बहिरन्तश्चाप्रकाशः संवृतात्मा नगात्मकः ।

मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम् ॥४७.१७ ॥

तं दृष्ट्वासाधकं सर्गममन्यदपरं पुनः ।

तस्याभिध्यायतः सर्गं तिर्यक्स्त्रोतो ह्यवर्तत ॥४७.१८ ॥

यस्मात्तिर्यक्प्रवृत्तिः सा तिर्यक्स्त्रोतस्ततः स्मृतः ।

पश्वादयस्ते विख्यातास्तमः प्रायो ह्यवेदिनः ॥४७.१९ ॥

अत्पथग्राहिनश्चैव तेऽज्ञाने ज्ञानमानिनः ।

अहङ्कृता अहंमाना अष्टाविशशद्विधात्मकाः ॥४७.२० ॥

अन्तः प्रकाशास्ते सर्वे आवृतास्तु परस्परम् ।

तमप्यसाधकं मत्वा ध्यायतोऽन्यस्ततोऽभवत् ॥४७.२१ ॥

ऊर्ध्वस्त्रोतस्तृतीयस्तु सात्त्विकः समवर्तत ।

ते सुखप्रीतिबहुला बहिरन्तस्त्वनावृताः ॥४७.२२ ॥

प्रकाशा बहिरन्तश्च ऊर्ध्वस्त्रोतः समुद्भवाः ।

तुष्टात्मकस्तृतीयस्तु देवसर्गो हि स स्मृतः ॥४७.२३ ॥

तस्मिन् सर्गेऽभवत् प्रीतिर्निष्पन्ने ब्रह्मणस्तदा ।

ततोऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमम् ॥४७.२४ ॥

तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः ।

प्रादुर्बभौ तदाव्यक्तादर्वाक्स्त्रोतस्तु साधकः ॥४७.२५ ॥

यस्मादर्वाग् व्यवर्तन्त ततोर्ऽवाक्स्त्रोतसस्तु ते ।

ते च प्रकाशबहुलास्तमोदि्रक्ता रजोऽधिकाः ॥४७.२६ ॥

तस्मात् ते दुः खबहुला भूयोभूयश्च कारिणः ।

प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते ॥४७.२७ ॥

पञ्चमोऽनुग्रहः सर्गः स चतुर्धा व्यवस्थितः ।

विपर्ययेण सिद्ध्या च शान्त्या तुष्ट्या तथैव च ॥४७.२८ ॥

निर्वृत्तं वर्तमानञ्च तेर्ऽथं जानन्ति वै पुनः ।

भूतादिकानां भूतानां षष्ठः सर्ग स उच्यते ॥४७.२९ ॥

ते परिग्राहिणः सर्वे संविभागरतास्तथा ।

चोदनाश्चाप्यशीलाश्च ज्ञेया भूतादिकाश्च ते ॥४७.३० ॥

प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।

तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ॥४७.३१ ॥

वैकारिकस्तृतीयस्तु सर्गश्चैन्दि्रयकः स्मृतः ।

इत्येष प्राकृतः सर्गः संभूतो बुद्धैपूर्वकः ॥४७.३२ ॥

मुख्यः सर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ।

तिर्यक्स्त्रोतस्तु यः प्रोक्तस्तिर्यग्योन्यः स पञ्चमः ॥४७.३३ ॥

तथोर्ध्वस्त्रोतसां षष्ठो देवसर्गस्तु स स्मृतः ।

ततोर्ऽवाक्स्त्रोतसां सर्गः सप्तमः स तु मानुषः ॥४७.३४ ॥

अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसश्च सः ।

पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः ॥४७.३५ ॥

प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः ।

इत्येते वै समाख्याता नव सर्गाः प्रजापतेः ॥४७.३६ ॥

इति श्री मार्कण्डेयपुराणे प्राकृतवैकृतसर्गो नाम

सप्तचात्वारिंशोऽध्यायः

48(45)

अष्टचत्वारिंशोऽध्यायः- ४८

क्रौष्टुकिरुवाच

समासात् कथिता सृष्टिः सम्यग् भगवता मम ।

देवादीनां भवं ब्रह्मन् विस्तरात्तु ब्रवीहि मे ॥४८.१ ॥

मार्कण्डेय उवाच

कुशलाकुशलैर्ब्रह्मन् ! भाविता पूर्वकमर्मभिः ।

ख्याता तथा ह्यनिर्मुक्ताः प्रलये ह्यु पसंहृताः ॥४८.२ ॥

देवाद्याः स्थावरान्ताश्च प्रजा ब्रह्मंश्चतुर्विधाः ।

ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तदा ॥४८.३ ॥

ततो देवासुरान् पितॄन् मानुषांश्च चतुष्टयम् ।

सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत् ॥४८.४ ॥

युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत् प्रजापतेः ।

सिसृक्षोर्जघनात् पूर्वमसुरा जज्ञिरे ततः ॥४८.५ ॥

उत्ससर्ज ततस्तान्तु तमोमात्रात्मिकां तनुम् ।

सापविद्धा तनुस्तेन सद्यो रात्रिरजायत ॥४८.६ ॥

अन्यां तनुमुपादाय सिसृक्षुः प्रीतिमाप सः ।

सत्त्वोद्रेकास्ततो देवा मुखतस्तस्य जज्ञिरे ॥४८.७ ॥

उत्ससर्ज च भूतेशस्तनुं तामप्यसौ विभुः ।

सा चापविद्धा दिवसं सत्त्वप्रायमजायत् ॥४८.८ ॥

सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।

पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥४८.९ ॥

सृष्ट्वा पितॄनुत्ससर्ज तनुं तामपि स प्रभुः ।

सा चोत्सृष्टाभवत् सन्ध्या दिवननक्तान्तरस्थिता ॥४८.१० ॥

रजोमात्रात्मिकामन्यां तनुं भेजेऽथ स प्रभुः ।
ततो मनुष्याः सम्भूता रजोमात्रासमुद्भवाः ॥४८.११ ॥
सृष्ट्वा मनुष्यान् स विभुरुत्ससर्ज तनुं ततः ।
ज्योत्स्ना समभवत् सा च नक्तान्तेऽहर्मुखे च या ॥४८.१२ ॥
इत्येतास्तनवस्तस्य देवदेवस्य धीमतः ।
ख्याता रात्र्यहनी चैव सन्ध्या ज्योत्स्ना च वै द्विज ॥४८.१३ ॥
ज्योत्स्तना सन्ध्या तथैवाह---सत्त्वमात्रात्मकं त्रयम् ।
तमोमात्रात्मिका रात्रिः सा वै तस्मात् त्रियामिका ॥४८.१४ ॥
तस्माद् देवा दिवा रात्रावसुरास्तु बलान्विताः ।
ज्योत्स्नागमे च मनुजाः सन्ध्यायां पितरस्तथा ॥४८.१५ ॥
भवन्ति बलिनोऽधृष्या विपक्षाणां न संशयः ।
तद्विपर्ययमासाद्य प्रयान्ति च विपर्ययम् ॥४८.१६ ॥
ज्योत्स्नो रात्र्यहनी सन्ध्या चत्वार्येतानि वै प्रभोः ।
ब्रह्मणस्तु शरीराणि त्रिगुणोपश्रितानि तु ॥४८.१७ ॥
चत्वार्येतान्यथोत्पाद्य तनुमन्यां प्रजापतिः ।
रजस्तमोमयीं रात्रौ जगृहे क्षुत्तृडन्वितः ॥४८.१८ ॥
तदन्धकारे क्षुत्क्षामानसृजद् भगवानजः ।

विरूपान् श्मश्रुलानत्तुमारब्धास्ते च तां तनुम् ॥४८.१९ ॥

रक्षाम इति तेभ्योऽन्ये य ऊचुस्ते तु राक्षसाः ।

खादाम इति ये चोचुस्ते यक्षा यक्षणात् द्विज ॥४८.२० ॥

तान् दृष्ट्वा ह्यप्रियेणास्य केशाः शीर्यन्त वेधसः ।

समारोहणहीनाश्च शिरसो ब्रह्मणस्तु ते ॥४८.२१ ॥

सर्पणात्तेऽभवन् सर्पा हीनत्वादहयः स्मृताः ।

सर्पान् दृष्ट्वा ततः क्रोधात् क्रोधात्मानो विनिर्ममे ॥४८.२२ ॥

वर्णेन कपिलेनोग्रास्ते भूताः पिशिताशनाः ।

ध्यायतो गां ततस्तस्य गन्धर्वा जज्ञिरे सुताः ॥४८.२३ ॥

जज्ञिरे पिबतो वाचं गन्धर्वास्तेन ते स्मृताः ।

अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः ॥४८.२४ ॥

ततः स्वदेहतोऽन्यानि वयांसि पशवोऽसृजत् ।

मुखतोऽजाः ससर्जाथ वक्षसश्चावयोऽसृजत् ॥४८.२५ ॥

गावश्चैवोदराद् ब्रह्मा पार्श्वाभ्याञ्च विनिर्ममे ।

पद्भ्याञ्चाश्वान् स मातङ्गान् रासबान् शशकान् मृगान् ॥४८.२६ ॥

उष्ट्रानश्वतरांश्चैव नानारूपाश्च जातयः ।

ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे ॥४८.२७ ॥

एवं पश्वोषधीः सृष्ट्वा ह्ययजच्चाध्वरे विभुः ।

तस्मादादौ तु कल्पस्य त्रेतायुगमुखे तदा ॥४८.२८ ॥

गौरजः पुरुषो मेषो अश्वाश्वतरगर्दभाः ।

एतान् ग्राम्यान् पशूनाहुरारण्यांश्च निबोध मे ॥४८.२९ ॥

श्वापदं द्विखुरं हस्ती वानराः पक्षिपञ्चमाः ।

औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ॥४८.३० ॥

गायत्रीञ्च ऋचञ्चैव त्रिवृत् सोमं रथन्तरम् ।

अग्निष्टोमञ्च यज्ञानां निर्ममे प्रथमान्मुखात् ॥४८.३१ ॥

यजूंषि त्रैष्टुभं धन्दः स्तोमं पञ्चदशन्तथा ।

बृहत् साम तथोकथञ्च दक्षिणादसृजन्मुखात् ॥४८.३२ ॥

सामानि जगतीच्छन्दः स्तोमं पञ्चदशन्तथा ।

वैरूपमतिरात्रञ्च निर्ममे पश्चिमान्मुखात् ॥४८.३३ ॥

एकविंशमथर्वाणमाप्तोर्यामाणमेव च ।

अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात् ॥४८.३४ ॥

विद्युतोऽशनिमेघाश्च रोहितेन्द्रधनूंषि च ।

वयांसि च ससर्जादौ कल्पस्य भगवान् विभुः ॥४८.३५ ॥

उच्चावचानि भूतानि गात्रेभ्यस्तलस्य जज्ञिरे ।

सृष्ट्वा चतुष्टयं पूर्वं देवासुरपितॄन् प्रजाः ॥४८.३६ ॥

ततोऽसृजत् स भूतानि स्थावराणि चराणि च ।

यक्षान् पिशाचान् गन्धर्वांस्तथैवाप्सरसाङ्गणान् ॥४८.३७ ॥

नरकिन्नररक्षांसि वयः पशुमृगोरगान् ।

अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमम् ॥४८.३८ ॥

तेषां ये यानि कर्माणि प्राक् सृष्टेः प्रतिपेदिरे ।

तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥४८.३९ ॥

हिंस्त्राहिंस्त्रे मृदुक्रूरे धर्माधर्मावृतानृते ।

तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥४८.४० ॥

इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ।

नानात्वं विनियोगञ्च धातैव व्यदधात् स्वयम् ॥४८.४१ ॥

नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् ।

वेदशब्देभ्य एवादौ देवादीनाञ्चकार सः ॥४८.४२ ॥

ऋषीणां नामधेयानि याश्च देवेषु सृष्टयः ।

शर्वर्यन्ते प्रसूतानामन्येषाञ्च ददाति सः ॥४८.४३ ॥

यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये ।

दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥४८.४४ ॥

एवंविधाः सृष्टयस्तु ब्रह्मणोऽव्यक्तजन्मनः ।

शर्वर्यन्ते प्रबुद्धस्य कल्पे कल्पे भवन्ति वै ॥४८.४५ ॥

इति श्रीमार्कण्डेयपुराणे सृष्टिप्रकारणनामाष्टचत्वारिंशोऽध्यायः

49(46)

ऊनपञ्चाशोऽध्यायः- ४९

क्रौष्टुकिरुवाच

अर्वाक्स्त्रोतस्तु कथितो भवता यस्तु मानुषः ।

ब्रह्मन् ! विस्तरतो ब्रूहि ब्रह्मा समसृजद्यथा ॥४९.१ ॥

यथा च वर्णानसृजद्यद् गुणाश्च महामते ।

यच्च येषां स्मृतं कर्म विप्रादीनां वदस्व तत् ॥४९.२ ॥

मार्कण्डेय उवाच

ब्रह्मणः सृजतः पूर्वं सत्याभिध्यायिनस्तथा ।

मिथुनानां सहस्रन्तु मुखात् सोऽथासृजन्मुने ॥४९.३ ॥

जातास्ते ह्यु पपद्यन्ते सत्त्वोद्रिक्ताः स्वतेजसः ।

सहस्रमन्यद्वक्षस्तो मिथुनानां ससर्ज ह ॥४९.४ ॥

ते सर्वे रजसोद्रिक्ताः शुष्मिणश्चाप्यमर्षिणः ।

ससर्जान्यते सहस्रन्तु द्वन्द्वानामूरुतः पुनः ॥४९.५ ॥

रजस्तमोभ्यामुद्रिक्ता ईहाशीलास्तु ते स्मृताः ।

पद्भ्यां सहस्रमन्यच्च मिथुनानां ससर्ज ह ॥४९.६ ॥

उद्रिक्तास्तमसा सर्वे निः श्रीका ह्यल्पचेतसः ।

ततः संहर्षमाणास्ते द्वन्द्वोत्पन्नास्तु प्राणिनः ॥४९.७ ॥

अन्योन्यहृच्छयाविष्टा मैथुनायोपचक्रमुः ।

ततः प्रभृति कल्पेऽस्मिन् मिथुनानां हि सम्भवः ॥४९.८ ॥

मासि मास्यार्तवं यत् तु न तदासीत्तु योषिताम् ।

तस्मात्तदा न सुषुवुः सेवितैरपि मैथुनैः ॥४९.९ ॥

आयुषोऽन्ते प्रसूयन्ते मिथुनान्येव ताः सकृत् ।

ततः प्रभृति कल्पेऽस्मिन् मिथुनानां हि सम्भवः ॥४९.१० ॥

ध्यानेन मनसा तासां प्रजानां जायते सकृत् ।

शब्दादिर्विषयः शुद्धः प्रत्येकं पञ्चलक्षणः ॥४९.११ ॥

इत्येषा मानुषी सृष्टिर्या पूर्वं वै प्रजापतेः ।

तस्यान्ववायसम्भूता यैरिदं पूरितं जगत् ॥४९.१२ ॥

सरित्सरः समुद्रांश्च सेवन्ते पर्वतानपि ।

तास्तदा ह्यल्पशीतोष्णा युगे तस्मिंश्चरन्ति वै ॥४९.१३ ॥

तृप्तिं स्वाभाविकीं प्राप्ता विषयेषु महामते ।

न तासां प्रतिघातोऽस्ति न द्वेषो नापि मत्सरः ॥४९.१४ ॥

पर्वतोदधिसेविन्यो ह्यनिकेतास्तु सर्वशः ।

ता वै निष्कामचारिण्यो नित्यं मुदितमानसाः ॥४९.१५ ॥

पिशाचोरगरक्षांसि तथा मत्सरिणो जनाः ।

पशवः पक्षिणश्चैव नक्रा मत्स्याः सरीसृपाः ॥४९.१६ ॥

अवारका ह्यण्डजा वा ते ह्यधर्मप्रसूतयः ।

न मूलफलपुष्पाणि नार्तवा वत्सराणि च ॥४९.१७ ॥

सर्वकालसुखः कालो नात्यर्थं घर्मशीतता ।

कालेन गच्छता तेषां चित्रा सिद्धिरजायत ॥४९.१८ ॥

ततश्च तेषां पूर्वाह्ने मध्याह्ने च वितृप्तता ।

पुनस्तथेच्छतां तृप्तिरनायासेन साभवत् ॥४९.१९ ॥

इच्छताञ्च तथायासो मनसः समजायत ।

अपां सौक्ष्म्यं ततस्तासां सिद्धिर्नानारसोल्लसा ॥४९.२० ॥

समजायत चैवान्या सर्वकामप्रदायिनी ।

असंस्कार्यैः शरीरैश्च प्रजास्ताः स्थिरयौवनाः ॥४९.२१ ॥

तासां विना तु संकल्पं जायन्ते मिथुनाः प्रजाः ।

समं जन्म च रूपञ्च म्रियन्ते चैव ताः समम् ॥४९.२२ ॥

अनिच्छाद्वेषसंयुक्ता वर्तन्ते तु परस्परम् ।

तुल्यरूपायुषः सर्वा अधमोत्तमतां विना ॥४९.२३ ॥

तत्वारि तु सहस्राणि वर्षाणां मानुषाणि तु ।

आयुः प्रमाणं जीवन्ति न च क्लेशाद्विपत्तयः ॥४९.२४ ॥

क्वचित् क्वचित् पुनः साभूत् क्षितिर्भाग्येन सर्वशः ।

कालेन गच्छता नाशमुपयान्ति यथा प्रजाः ॥४९.२५ ॥

तथा ताः क्रमशो नाशं जग्मुः सर्वत्र सिद्धयः ।

तासु सर्वासु नष्टासु नभसः प्रच्युता नराः ॥४९.२६ ॥

प्रायशः कल्पवृक्षास्ते संभूता गृहसंज्ञिताः ।

सर्वे प्रत्युपभोगाश्च तासं तेभ्यः प्रजायते ॥४९.२७ ॥

वर्तयन्ति स्म तेभ्यस्तास्त्रेतायुगमुखे तदा ।

ततः कालेन वै रागस्तासामाकस्मिको ऽभवत् ॥४९.२८ ॥

मासि मास्यार्तवोत्पत्त्या गर्भोत्पत्तिः पुनः पुनः ।

रागोत्पत्त्या ततस्तासां वृक्षास्ते गृहसंज्ञिताः ॥४९.२९ ॥

ब्रह्मन्नन्वपरेषान्तु पेतुः शाखा महीरुहाम् ।

वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ॥४९.३०॥

तेष्वेव जायते तेषां गन्धवर्णरसान्वितम् ।

अमाक्षिकं माहवीर्यं पुटके पुटके मधु ॥४९.३१॥

तेन वा वर्तयन्ति स्म मुखे त्रेयायुगस्य वै ।

ततः कालान्तरेणैव पुनर्लोभान्वितास्तु ताः ॥४९.३२॥

वृक्षांस्ताः पर्यगृह्णन्त ममत्वाविष्टचेतसः ।

नेशुस्तेनापचारेण तेऽपि तासां महीरुहाः ॥४९.३३॥

ततो द्वन्द्वान्यजायन्ते शीतोष्णक्षुन्मुखानि वै ।

तास्तद्द्वन्द्वोपघातार्थं चक्रुः पूर्वं पुराणि तु ॥४९.३४॥

मरुधन्वषु दुर्गेषु पर्वतेषु दरीषु च ।

संश्रयन्ति च दुर्गाणि वार्क्षं पार्वतमौदकम् ॥४९.३५॥

कृत्रिमञ्च तथा दुर्गं मित्वा मित्वात्मनो।ङ्गुलैः ।

मानार्थानि प्रमाणानि तास्तु पूर्वं प्रचक्रिरे ॥४९.३६॥

परमाणुः परं सूक्ष्मं त्रषरेणुर्महीरजः ।

बालाग्रञ्चैव लिक्षां च यूकां चाथ यवोदरम् ॥४९.३७॥

क्रमादष्टगुणान्याहुर्यवानष्टौ तथाङ्गुलम् ।

षडङ्गुलं पदं तच्च वितस्तिर्द्विगुणं स्मृतम् ॥४९.३८ ॥

द्वे वितस्ती तथा हस्तो ब्राह्म्यतीर्थादिवेष्टनः ।

चतुर्हस्तं धनुर्दण्डो नाडिकार्युगमेव च ॥४९.३९ ॥

धनुषां द्वे सहस्रे तु गव्यूतिस्तच्चतुर्गुणम् ।

प्रोक्तञ्च योजवनं प्राज्ञैः संख्यानार्थमिदं परम् ॥४९.४० ॥

चतुर्णामथ दुर्गाणां स्वसमुत्थानि त्रीणि तु ।

चतुर्थं कृत्रिमं दुर्गं ते चक्रुर्यत्नतस्तु वै ॥४९.४१ ॥

पुरञ्च खेटकञ्चैव तद्वद् द्रोणीमुखं द्विज ।

शाखानगरकञ्चापि तथा कर्वटकं द्रमी ॥४९.४२ ॥

ग्रामं सघोषविन्यासं तेषु चावसथान् पृथक् ।

सोत्सेधवप्रकारञ्च सर्वतः परिखावृतम् ॥४९.४३ ॥

योजनार्धार्धविष्कम्भमष्टभागायतं पुरम् ।

प्रागुदक्प्रवणं शस्तं शुद्धवंशबहिर्गमम् ॥४९.४४ ॥

तदर्धेन तथा खेटं तत्पादेन च कर्वटम् ।

न्यूनं द्रोणीमुखं तस्मादन्तभागेन चोच्यते ॥४९.४५ ॥

प्राकारपरिखाहीनां पुरं खर्वटमुच्यते ।

शाखानगरकञ्चान्यन्मन्त्रिसामन्तभुक्तिमत् ॥४९.४६ ॥

तथा शूद्रजनप्राया: स्वसमृद्धिकृषीबला: ।
क्षेत्रोपभोग्यभूमध्ये वसतिग्र्रामसंज्ञिता ॥४९.४७ ॥
अन्यस्मान्नगरादेर्या कार्यमुद्दिश्य मानवै: ।
क्रियते वसति: सा वै विज्ञेया वसतिर्नरै: ॥४९.४८ ॥
दुष्टप्रायो विना क्षेत्रै: परभूमिचरो बली ।
ग्राम एव द्रमीसंज्ञो राजवल्लभसंश्रय: ॥४९.४९ ॥
शकटारूढभाण्डैश्च गोपालैर्विपणं विना ।
गोसमूहैस्तथा घोषो यत्रेच्छाभूमिकेतन: ॥४९.५० ॥
त एवं नगरादींस्तु कृत्वा वासार्थमात्मन: ।
निकेतनानि द्वन्द्वानां चक्रुरावसथाय वै ॥४९.५१ ॥
गृहाकारा यथा पूर्वं तेषामासन्नहीरुहा: ।
तथा संस्मृत्य तत्सर्वं चक्रुर्वेश्मानि ता: प्रजा: ॥४९.५२ ॥
वृक्षस्यैवङ्गता: शाखास्तथैवञ्चापरी गता: ।
नताश्चैवोन्नताश्चैव तद्वच्छाखा: प्रचक्रिरे ॥४९.५३ ॥
या: शाखा: कल्पवृक्षाणां पूर्वमासन् द्विजोत्तम ।
ता एव शाखा गेहानां शालात्वं तेन तासु तत् ॥४९.५४ ॥
कृत्वा द्वन्द्वोपघातन्ते वार्तोपायमचिन्तयन् ।

नष्टेषु मधुना सार्धं कल्पवृक्षेष्वशेषतः ॥४९.५५ ॥

विषादव्याकुलास्ता वै प्रजास्तृष्णाक्षुधार्दिताः ।

ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतामुखे तदा ॥४९.५६ ॥

वार्तास्वसाधिता ह्यन्या वृष्टिस्तासां निकामतः ।

तासां वृष्ट्युदकानीह यानि निम्नगतानि वै ॥४९.५७ ॥

वृष्ट्यावरुद्धैरभवत् स्त्रोतः खातानि निम्नगाः ।

ये पुरस्तादपां स्तोका आपन्नाः पृथिवीतले ॥४९.५८ ॥

ततो भूमेश्च संयोगादोषध्यस्तास्तदा भवन् ।

अफालकृष्टाश्चानुप्ता ग्राम्यारण्याश्चतुर्दश ॥४९.५९ ॥

ऋतुपुष्पफलाश्चैव वृक्षा गुल्माश्च जज्ञिरे ।

प्रादुर्भावस्तु त्रेतायामाद्योऽयमौषधस्य तु ॥४९.६० ॥

तेनौषधेन वर्तन्ते प्रजास्त्रेतायुगे मुने ।

रागलोभौ समासाद्य प्रजाश्चाकस्मिकौ तदा ॥४९.६१ ॥

ततस्ताः पर्यग्वह्णन्त नदीक्षेत्राणि पर्वतान् ।

वृक्षगुल्मौषधीश्चैवमात्मन्यायाद्यथाबलम् ॥४९.६२ ॥

तेन दोषेण ता नेशुरौषध्यो मिषतां द्विज ।

अग्रसद् भूर्युगपत्तास्तदौषध्यो महामते ॥४९.६३ ॥

पुनस्तासु प्रणष्टासु विभ्रान्तास्ताः पुनः प्रजाः ।

ब्रह्माणं शरणं जग्मुः क्षुधार्ताः परमेष्ठिनम् ॥४९.६४ ॥

स चापि तत्त्वतो ज्ञात्वा तदा ग्रस्तां वसुन्धराम् ।

वत्सं कृत्वा सुमेरुन्तु दुदोह भगवान् विभुः ॥४९.६५ ॥

दुग्धेयं गौस्तदा तेन शस्यानि पृथिवीतले ।

जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तु ताः पुनः ॥४९.६६ ॥

ओषध्यः फलपाकान्ता गणाः सप्तदशा स्मृताः ।

व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः ॥४९.६७ ॥

प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ।

माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ॥४९.६८ ॥

आढकाश्चणकाश्चैव गणाः सप्तदश स्मृताः ।

इत्येता ओषधीनान्तु ग्राम्याणां जातयः पुरा ॥४९.६९ ॥

ओषध्यो जज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ।

व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः ॥४९.७० ॥

प्रियङ्गुसप्तमा ह्येते अष्टमास्तु कुलत्थकाः ।

श्यामाकास्त्वथ नीवारा यत्तिला सगवेधुकाः ॥४९.७१ ॥

कुरुविन्दा मर्कटकास्तथा वेणुयवाश्च ये ।

ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश ॥४९.७२ ॥
यदा प्रसृष्टा ओषध्यो न प्ररोहन्ति ताः पुनः ।
ततः स तासां वृद्ध्यर्थं वार्तोपायञ्चकार ह ॥४९.७३ ॥
ब्रह्मा स्वयम्भूर्भगवान् हस्तसिद्धिञ्च कर्मजाम् ।
ततः प्रभृत्यथौषध्यः कृष्टपच्यास्तु जज्ञिरे ॥४९.७४ ॥
संसिद्धायान्तु वार्तायां ततस्तासां स्वयं प्रभुः ।
मर्यादां स्थापयामास यथान्यायं यथागुणम् ॥४९.७५ ॥
वर्णानामाश्रमाणाञ्च धर्मान् धर्मभृतांवर ।
लोकानां सर्ववर्णानां सम्यग्धर्मार्थपालिनाम् ॥४९.७६ ॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम् ॥४९.७७ ॥
वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्तताम् ।
गान्धर्वं शूद्रजातीनां परिचर्यानुवर्तताम् ॥४९.७८ ॥
अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसाम् ।
स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम् ॥४९.७९ ॥
सप्तर्षीणान्तु यत् स्थानं स्मृतं तद्वै वनौकसाम् ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयम् ।

योगिनाममृतं स्थानमिति वै स्थानकल्पना ॥४९.८० ॥

इति श्रीमार्कण्डेयपुराणे सृष्टिप्रकरणे एकोनपञ्चाशदध्यायः

50(47)

मार्कण्डेय उवाच

ततोऽभिद्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ।

तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह ॥५०.१ ॥

क्षेत्रज्ञाः समवर्तन्त गात्रेभ्यस्तस्य धीमतः ।

ते सर्वे समवर्तन्त ये मया प्रगुदाहृताः ॥५०.२ ॥

देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषयाः स्मृताः ।

एवंभूतानि सृष्टानि स्थावराणि चराणि च ॥५०.३ ॥

यदास्य ताः प्रजाः सर्वा न व्यवर्धन्त धीमतः ।

अथान्यान्मानसान् पुत्रानु सदृशानात्मनोऽसृजत् ॥५०.४ ॥

भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसन्तथा ।

मरीचिं दक्षमत्रिञ्च वसिष्टञ्चैव मानसम् ॥५०.५ ॥
नव ब्रह्माण इत्येते पुराणे निश्चयङ्गताः ।
ततोऽसृजत् पुनर्ब्रह्मा रुद्रं क्रोधात्मसम्भवम् ॥५०.६ ॥
सङ्कल्पञ्चैव धर्मञ्च पूर्वेषामपि पूर्वजम् ।
सनन्दनादयो ये च पूर्वं सृष्टाः स्वयंभुवा ॥५०.७ ॥
न ते लोकेषु सज्जन्तो निरपेक्षाः समाहिताः ।
सर्वे तेऽनागतज्ञाना वीतरागा विमत्सराः ॥५०.८ ॥
तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ।
ब्रह्मणोऽभून्महाक्रोधस्तत्रोत्पन्नोर्ऽकसन्निभः ॥५०.९ ॥
अर्धनारीनरवपुः पुरुषोऽतिशरीरवान् ।
विभजात्मानमित्युक्त्वा स तदान्तर्दधे ततः ॥५०.१० ॥
स चोक्तो वै पृथक् स्त्रीत्वं पुरुषत्वं तथाकरोत् ।
बिभेद पुरुषत्वञ्च दशधा चैकधा तु सः ॥५०.११ ॥
सौम्यासौम्यैस्तथा शान्तैः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः ।
बिभेद बहुधा देवः पुरुषैरसितैः सितैः ॥५०.१२ ॥
ततो ब्रह्मात्मसम्भूतं पूर्वं स्वायम्भुवं प्रभुः ।
आत्मनः सदृशं कृत्वा प्रजापालो मनुं द्विज ॥५०.१३ ॥

शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥५०.१४ ॥
तस्माच्च पुरुषात् पुत्रौ शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्मभिः ॥५०.१५ ॥
कन्ये द्वे च तथा ऋद्धिं प्रसूतिञ्च ततः पिता ।
ददौ प्रसूतिं दक्षाय तथा ऋद्धिं रुचेः पुरा ॥५०.१६ ॥
प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः ।
पुत्रो जज्ञे महाभाग ! दम्पतीमिथुनं ततः ॥५०.१७ ॥
यज्ञस्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवोऽन्तरे ॥५०.१८ ॥
तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सभास्वराः ।
प्रसूत्याञ्च तथा दक्षश्चतस्त्रो विंशतिस्तथा ॥५०.१९ ॥
ससर्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु ।
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ॥५०.२० ॥
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी ।
पत्न्यर्थे प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ॥५०.२१ ॥
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ।

ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिस्तथा क्षमा ॥५०.२२ ॥

सन्ततिश्चानसूया च ऊर्जा स्वाहा स्वधा तथा ।

भृगुर्भवो मरीचिश्च तथा चैवाङ्गिरा मुनिः ॥५०.२३ ॥

पुलस्त्यः पुलहश्चैव क्रतुश्च ऋषयस्तथा ।

वसिष्ठोऽत्रिस्तथा वह्निः पितरश्च यथाक्रमम् ॥५०.२४ ॥

ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तमाः ।

श्रद्धा कामं श्रीश्च दर्पं नियमं धृतिरात्मजम् ॥५०.२५ ॥

सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरजायत ।

मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ॥५०.२६ ॥

बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।

व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ॥५०.२७ ॥

सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मयोनयः ।

कामादतिमुदं हर्षं धर्मपौत्रमसूयत ॥५०.२८ ॥

हिंसा भार्या त्वधर्मस्य तस्यां जज्ञे तथानृतम् ।

कन्या च निरृतिस्तस्यां सुतौ द्वौ नरकं भयम् ॥५०.२९ ॥

माया च वेदना चैव मिथुनं द्वयमेतयोः ।

तयोर्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥५०.३० ॥

वेदनात्मसुतश्चापि दुःखं जज्ञेऽथ रौरवात् ।

मृत्योर्व्याधि-जरा-शोक-तृष्णा-क्रोधाश्च जज्ञिरे ॥५०.३१ ॥

दुः खोद्भवाः स्मृता ह्येते सर्वे वाधर्मलक्षणाः ।

नैषां भार्यास्ति पुत्रो वा सर्वे ते ह्यूर्ध्वरेतसः ॥५०. ३२ ॥

निरृतिश्च तथा चान्या मृत्योर्भार्याभवन्मुने ।

अलक्ष्मीर्नाम तस्याञ्च मृत्योः पुत्राश्चतुर्दश ॥५०.३३ ॥

अलक्ष्मीपुत्रका ह्येते मृत्योरादेशकारिणः ।

विनाशकालेषु नरान् भजन्त्येते शृणुष्व तान् ॥५०.३४ ॥

इन्द्रियेषु दशस्वेते तथा मनसि च स्थिताः ।

स्वे स्वे नरं स्त्रियं वापि विषये योजयन्ति हि ॥५०.३५ ॥

अथेन्द्रियाणि चाक्रम्य रागक्रोधादिभिर्नरान् ।

योजयन्ति यथा हानिं यान्त्यधर्मादिभिर्द्विज ॥५०.३६ ॥

अहङ्कारगतश्चान्यस्तथान्यो बुद्धिसंस्थितः ।

विनाशाय नराः स्त्रीणां यतन्ते महोसंश्रिताः ॥५०.३७ ॥

तथैवान्यो गृहे पुंसां दुः सहो नाम विश्रुतः ।

क्षुत्क्षामोऽधोमुखो नग्नश्चीरी काकसमस्वनः ॥५०.३८ ॥

स सर्वान् खादितुं सृष्टो ब्रह्मणा तमसो निधिः ।

दंष्ट्राकरालमत्यर्थं विवृतास्यं सुभैरवम् ॥५०.३९ ॥

तमत्तुकाममाहेदं ब्रह्मा लोकपितामहः ।

सर्वब्रह्ममयः शुद्धः कारणं जगतोऽव्ययः ॥५०.४० ॥

ब्रह्मोवाच

नात्तव्यन्ते जगदिदं जहि कोपं शमं व्रज ।

त्यजैनान्तामसी वृत्तिमपास्य रजसः कलाम् ॥५०.४१ ॥

दुःसह उवाच

क्षुत्क्षामोऽस्मि जगन्नाथ ! पिपासुश्चापि दुर्बलः ।

कथं तृप्तिमियान्नाथ ! भवेयं बलवान् कथम् ।

कश्चाश्रयो ममाख्याहि वर्तेयं यत्र निर्वृतः ॥५०.४२ ॥

ब्रह्मोवाच

तवाश्रयो गृहं पुंसां जनश्चाधार्मिको बलम् ।

पुष्टिं नित्यक्रियाहान्या भवान् वत्स ! गमिष्यति ॥५०.४३ ॥

वृथास्फोटाश्च ते वस्त्रमाहारञ्च ददामि ते ।

क्षतं कीटावपन्नञ्च तथा श्वबिरवेक्षितम् ॥५०.४४ ॥

भग्नभाणागतन्तद्वन्मुखवातोपशामितम् ।

उच्छिष्टापक्वमास्विन्नमवलीढमसंस्कृतम् ॥५०.४५ ॥

भग्नासनस्थितैर्भुक्तमासन्नागतमेव च ।

विदिङ्मुखं सन्ध्ययोश्च नृत्यवाद्यस्वनाकुलम् ॥५०.४६ ॥

उदक्योपहतं भुक्तमुदक्या दृष्टमेव च ।

यच्चोपघातवत् किञ्चिद् भक्षयं पेयमथापि वा ॥५०.४७ ॥

एतानि तव पुष्ट्यर्थमन्यच्चापि ददामि ते ।

अश्रद्धया हुतं दत्तमस्नातैर्यदवज्ञया ॥५०.४८ ॥

यन्नाम्बुपूर्वकं क्षिप्तमनर्थोकृतमेव च ।

त्यक्तुमाविष्कृतं यत् तु दत्तं चैवातिविस्मयात् ॥५०.४९ ॥

दुष्टं क्रुद्धार्तदत्तञ्च यक्ष तद्भागि तत् फलम् ।

यच्च पौनर्भवः किञ्चित् करोत्यामुष्मिकं क्रमम् ॥५०.५० ॥

यच्च पौनर्भवा योषित् तद्यक्ष ! तव तृप्तये ।

कन्याशुल्कोपधानाय समुपास्ते धनक्रियाः ॥५०.५१ ॥

तथैव यक्ष ! पुष्ट्यर्थमसच्छास्त्रक्रियाश्च याः ।

यच्चार्थनिर्वृतं किञ्चिदधीतं यन्न सत्यतः ॥५०.५२ ॥

तत सर्वं तव कालांश्च ददामि तव सिद्धये ।

गुर्विण्यभिगमे सन्ध्यानित्यकार्यव्यतिक्रमे ॥५०.५३ ॥

असच्छास्त्रक्रियालापदूषितेषु च दुः सह ।

तवाभिभवसामर्थ्यं भविष्यति सदा नृषु ॥५०.५४ ॥

पङ्क्तिभेदे वृथापाके पाकभेदे तथा क्रिया ।

नित्यञ्च गेहकलहे भविता वसतिस्तव ॥५०.५५ ॥

अपोष्यमाणे च तथा भृत्ये गोवाहनादिके ।

असन्ध्याभ्युक्षितागारे काले त्वत्तो भयं नृणाम् ॥५०.५६ ॥

नक्षत्रग्रहपीडासु त्रिविधोत्पातदर्शने ।

अशान्तिकपरान् यक्ष ! नरानभिभविष्यसि ॥५०.५७ ॥

वृथोपवासिनो मर्त्या द्यूतस्त्रीषु सदा रताः ।

त्वद्भाषणोपकर्तारो वैडालव्रतिकाश्च ये ॥५०.५८ ॥

अब्रह्मचारिणाधीतमिज्या चाविदुषा कृता ।

तपोवने ग्राम्यभुजां तथैवानिर्वजितात्मनाम् ॥५०.५९ ॥

ब्राह्मण-क्षत्रिय-विशां शूद्राणाञ्च स्वकर्मतः ।

परिच्युतानां या चेष्टा परलोकार्थमीप्सताम् ॥५०.६० ॥

तस्याश्च यत् फलं सर्वं तत् ते यक्ष ! भविष्यति ।

अन्यच्च ते प्रयच्छामि पुष्ट्यर्थं सन्निबोध तत् ॥५०.६१ ॥

भवतो वैश्वदेवान्ते नामोच्चारणपूर्वकम् ।

एतत् तवेति दास्यन्ति भवतो बलिमूर्जितम् ॥५०.६२ ॥

यः संस्कृताशी विधिवच्छुचिरन्तस्तथा बहिः ।

अलोलुपो जितस्त्रीकस्तद्देहमपवर्जय ॥५०.६३ ॥

पूज्यन्ते हव्यकव्याभ्यां देवताः पितरस्तथा ।

यामयोऽतिथयश्चापि तद्गेहं यक्ष ! वर्जय ॥५०.६४ ॥

यत्र मैत्री गृहे बालवृद्धयोषिन्नरेषु च ।

तथा स्वजनवर्गेषु गृहं तच्चापि वर्जय ॥५०.६५ ॥

योषितोऽबिरता यत्र न वहिर्गमनोत्सुकाः ।

लज्जान्विताः सदा गेहं यक्ष ! तत् परिवर्जय ॥५०.६६ ॥

वयः सम्बन्धयोग्यानि शयनान्यशनानि च ।

यत्र गेहे त्वया यक्ष ! तद्वर्ज्यं वचनान्मम ॥५०.६७ ॥

यत्र कारुणिका नित्यं साधुकर्मण्यवस्थिताः ।

सामान्योपस्करैर्युक्तास्त्यजेथा यक्ष ! तद्गृहम् ॥५०.६८ ॥

यत्रासनस्थास्तिष्ठत्सु गुरु-वृद्ध-द्विजातिषु ।

न तिष्ठन्ति गृहं तच्च वर्ज्यं यक्ष ! त्वया सदा ॥५०.६९ ॥

तरुगुल्मादिभिर्धारं न विद्धं यस्य वेश्मनः ।

मर्मभेदोऽथवा पुंसस्तच्छ्रेयो भवनं न ते ॥५०.७० ॥

देवतापितृभृत्त्यानामतिथीनाञ्च वर्तनम् ।

य्सायवशिष्टेनान्नेन पुंसस्तस्य गृहं त्यज ॥५०. ७१ ॥

सत्यवाक्यान् क्षमाशीलानहिंस्त्रान्नानुतापिनः ।

पुरुषानीदृशान् यक्ष ! त्यजेथाश्चानसूयकान् ॥५०.७२ ॥

भर्तृशुश्रूषणे युक्तामसत्स्त्रीसङ्गवर्जिताम् ।

कुटुम्बभर्तृशेषान्नपुष्टाञ्च त्यज योषितम् ॥५०.७३ ॥

यजनाध्ययनाभ्यासदानासक्तमतिं सदा ।

याजनाध्यापनादानकृतवृत्तिं द्विजं त्यज ॥५०.७४ ॥

दानाध्ययनयज्ञेषु सदोद्युक्तञ्च दुः सह ।

क्षत्रियं त्यज सच्छुल्कशस्त्राजीवात्तवेतनम् ॥५०.७५ ॥

त्रिभिः पूर्वगुणैर्युक्तं पाशुपाल्य-वणिज्ययोः ।

कृषेश्चावाप्तवृत्तिञ्च त्यज वैश्यमकल्मषम् ॥५०.७६ ॥

दानेज्या-द्विजशुश्रूषा-तत्परं यक्ष ! सन्त्यज ।

शूद्रञ्च ब्राह्मणादीनांशुश्रूषावृत्तिपोषकम् ॥५०.७७ ॥

श्रुतिस्मृत्यविरोधेन कृतवृत्तिर्गृहे गृही ।

यत्र तत्र च तत्पत्नि तस्यैवानुगतात्मिका ॥५०.७८ ॥

यत्र पुत्रो गुरोः पूजां देवानाञ्च तथा पितुः ।

पत्नी च भर्तुः कुरुते तत्रालक्ष्मीभयं कुतः ॥५०.७९ ॥

सदानुलिप्तं सन्ध्यासु गृहमम्बुसमुक्षितम् ।

कृतपुष्पबलिं यक्ष ! न त्वं शक्नोषि वीक्षितुम् ॥५०.८० ॥

भास्करादृष्टशय्यानि नित्याग्निसलिलानि च ।

सूर्यावलोकदीपानि लक्ष्म्या गेहानि भाजनम् ॥५०.८१ ॥

यत्रोक्षा चन्दनं वीणा आदर्शो मधुसर्पिषी ।

विषाज्यताम्रपात्राणि तद्गृहं न तवाश्रयः ॥५०.८२ ॥

यत्र कष्टकिनो वृक्षा यत्र निष्पाववल्लरी ।

भार्या पुनर्भूर्वल्मीकस्तद्यक्ष ! तव मन्दिरम् ॥५०.८३ ॥

यस्मिन् गृहे नराः पञ्च स्त्रीत्रयं तावतीश्च गाः ।

अन्धकारेन्धनाग्निश्च तद्गृहं वसतिस्तव ॥५०.८४ ॥

एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।

षडश्वं सप्तमातङ्गं गृहं यक्षाशु शोषय ॥५०.८५ ॥

कुद्दालदात्रपिटकं तद्वत् स्थाल्यादिभाजनम् ।

यत्र तत्रैव क्षिप्तानि तव दद्युः प्रतिश्रयम् ॥५०.८६ ॥

मुसलोलूखले स्त्रीणामास्या तद्वदुदुम्बरे ।

अवस्करे मन्त्रणञ्च यक्षैतदुपकृत् तव ॥५०.८७ ॥

लङ्घ्यन्ते यत्र धान्यानि पक्वापक्वानि वेश्मनि ।

तद्वच्छास्त्राणि तत्र त्वं यथेष्टं चर दुः सह ॥५०.८८ ॥

स्थालीपिधाने यत्राग्निर्दत्तो दर्वोफलेन वा ।

गृहे तत्र दुरिष्टानामशेषाणां समाश्रयः ॥५०.८९ ॥

मानुषास्थि गृहे यत्र दिवारात्रं मृतस्थितिः ।

तत्र यक्ष ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥५०.९० ॥

अदत्त्वा भुञ्जते ये वै बन्धोः पिण्डं तथोदकम् ।

सपिण्डान् सोदकांश्चैव तत्काले तान् नरान् भज ॥५०.९१ ॥

यत्र पद्मपहापद्मौ सुरभिर्मोकाशिनी ।

वृषभैरावतौ यत्र कल्प्यन्ते तद्गृहं त्यज ॥५०.९२ ॥

अशस्त्रा देवता यत्र सशस्त्राश्चाहवं विना ।

कल्प्यन्ते मनुजैरर्च्यास्तत् परित्यज मन्दिरम् ॥५०.९३ ॥

पौरजानपदैर्यत्र प्राक्प्रसिद्धमहोत्सवाः ।

क्रियन्ते पूर्ववद् गेहे न त्वं तत्र गृहे चर ॥५०.९४ ॥

शूर्पवातघटाम्भोभिः स्त्रानं वस्त्राम्बुविप्रुषैः ।

नखाग्रसलिलैश्चैव तान् याहि हतलक्षणान् ॥५०.९५ ॥

देशाचारान् समयान् ज्ञातिधर्मं

जपं होपं मङ्गलं देवतेष्टिम् ।

सम्यक्शौचं विधिवल्लोकवादान्

पुंसस्त्वया कुर्वतो मास्तु सङ्गः ॥५०.१६ ॥

मार्कण्डेय उवाच

इत्युक्त्वा दुःसहं ब्रह्मा तत्रैवान्तरधीयत ।

चकार शासनं सोऽपि तथा पङ्कजजन्मनः ॥५०.१७ ॥

इति श्रीमार्कण्डेयपुराणे यक्षानुशासनो नाम पञ्चाशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium